श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये अष्टाविंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये अष्टाविंशं दशकम् ॥

## अमृतमथने कालकूटाद्युत्पत्तिवर्णनं, लक्ष्मीस्वयंवरवर्णनं, अमृतोत्पत्तिवर्णनम् च

गरलं तरलानलं पुरस्ता -
    ज्जलधेरुद्विजगाल कालकूटम्।
अमरस्तुतिवादमोदनिघ्नो
    गिरिशस्तन्निपपौ भवत्प्रियार्थम्॥ **28.1** ॥

विमथत्सु सुरासुरेषु जाता
    सुरभिस्तामृषिषु न्यधास्त्रिधामन्।
हयरत्नमभूदथेभरत्नं
    द्युतरुश्चाप्सरसः सुरेषु तानि॥ **28.2** ॥

जगदीश भवत्परा तदानीं
    कमनीया कमला बभूव देवी।
अमलामवलोक्य यां विलोलः
    सकलोऽपि स्पृहयाम्बभूव लोकः॥ **28.3** ॥

त्वयि दत्तहृदे तदैव देव्यै
    त्रिदशेन्द्रो मणिपीठिकां व्यतारीत्।
सकलोपहृताभिषेचनीयैः
    ऋषयस्तां श्रुतिगीर्भिरभ्यषिञ्चन्॥ **28.4** ॥

अभिषेकजलानुपातिमुग्ध -
    त्वदपाङ्गैरवभूषिताङ्गवल्लीम्।

मणिकुण्डलपीतचेलहार -
 प्रमुखैस्तामामरादयोऽन्वभूषन् ॥ **28.5** ॥

वरणस्रजमात्तभृङ्गनादां
 दधती सा कुचकुम्भमन्दयाना।
पदशिञ्जितमञ्जुनूपुरा त्वां
 कलितव्रीलविलाससमाससाद ॥ **28.6** ॥

गिरिश द्रुहिणादिसर्वदेवान्
 गुणभाजोऽप्यविमुक्तदोषलेशान्।
अवमृश्य सदैव सर्वरम्ये
 निहिता त्वय्यनयाऽपि दिव्यमाला ॥ **28.7** ॥

उरसा तरसा ममानिथैनां
 भुवनानां जननीमनन्यभावाम्।
त्वदुरोविलसत्तदीक्षणश्री -
 परिवृष्ट्या परिपुष्टमास विश्वम् ॥ **28.8** ॥

अतिमोहनविभ्रमा तदानीं
 मदयन्ती खलु वारुणी निरागात्।
तमसः पदवीमदास्त्वमेना -
 मतिसम्माननया महासुरेभ्यः ॥ **28.9** ॥

तरुणाम्बुदसुन्दरस्तदा त्वं
 ननु धन्वन्तरिरुत्थितोऽम्बुराशेः।
अमृतं कलशे वहन् कराभ्या -
 मखिलार्तिं हर मारुतालयेश ॥ **28.10** ॥

॥ इति श्रीमन्नारायणीये अष्टाविंशं दशकं समाप्तम् ॥